# समवायाङ्गोपनिषद्



एसो चेव महादीवो
लोयालोयावलोयणो

सर्वलब्धिनिधान पञ्चमगणधर

परमपूजनीयश्रीसुधर्मस्वामिभगवत्प्रणीत-

समवायाङ्गसूत्रसारसमुच्चयरूपा

# समवायाङ्गोपनिषद्

नवसर्जनम्-सम्पादनम्

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशक

श्री जिनशासन आराधना ट्रस्ट

णमोत्थु णं समणस्स भगवओ महावीरस्स

શ્રી પ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષસૂરિભ્યો નમઃ

**મૂળ સૂત્ર** : **સમવાયાંગસૂત્ર**

(ચતુર્થ આગમ ગ્રંથાગ્ર ૧૬૬૭, ભાષા - અર્ધમાગધી)

**અર્થાગમ** : ચરમતીર્થપતિ કરુણાસાગર શ્રમણ ભગવાન શ્રી **મહાવીરસ્વામી**

**સૂત્રકાર** : પંચમગણધર સર્વલબ્ધિનિધાન શ્રી **સુધર્મસ્વામી** ભગવાન

**સારસંચય** : **સમવાયાંગોપનિષદ્**

**આલંબન** : મૂળ સૂત્ર અને અનેક ટીકાઓ

**સંચય+સંપાદન** : પ્રાચીનશ્રુતોદ્ધારક આચાર્ય શ્રી **હેમચંદ્રસૂરિ** શિષ્ય આચાર્ય શ્રી **કલ્યાણબોધિસૂરિ**


**સહયોગ** : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-રાજપ્રેમવિજયજી મ.સા.

**પ્રકાશક** : શ્રી જિનશાસન આરાધના ટ્રસ્ટ

**મુદ્રક** : મલ્ટી ગ્રાફિક્સ
www.multygraphics.com

---

સને 2013 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૯ • વી.સં.૨૫૩૯

પ્રતિ : 500 • ₹ 50/-

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




# અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# લ્હાવો

શબ્દો
જે ખાતરી આપે છે
અશબ્દ બનાવી દેવાની.
ક્યાંથી મળશે
આ લ્હાવો?
ચાલો,
લૂંટી લઈએ.

– આ. કલ્યાણબોધિસૂરિ

# अथ

# समवायाङ्गोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं, सूरीन्द्रमेवं गुरुहेमचन्द्रम्। प्रणम्य नम्यं प्रचिनोमि रम्यं, सुधावतारं समवायसारम्॥

॥१॥

इह हि परमकारुणिको भगवान् श्रीसुधर्मस्वामी श्रीजम्बूस्वामिनमाह- श्रुतं मयाऽऽयुष्मन्! तेन भगवतैव- माख्यातम्, "एक आत्मा, द्रव्यार्थ- तयैकत्वात्। एकोऽनात्मा, अनुपयोग- लक्षणैकस्वभावयुक्तत्वात्। एको दण्ड इत्यादि नेयं स्थानाङ्गानुसारेण।

सागरादिनाम्नि विमान उत्पन्नानां देवानामुत्कृष्टमायुरेकं सागरोपमम्। ते देवा एकपक्षस्यान्त उच्छ्वासादि कुर्वन्ति। वर्षसहस्रस्यान्ते तेषामुत्पद्यत आहारप्रयोजनम्। सन्त्येके भवसिद्धिका जीवाः, य एकेन भवग्रहणेन सेत्स्यन्ति।

||२||

दण्डद्वयम्–अर्थानर्थभेदतः। बन्धन–द्वयम्–रागद्वेषलक्षणम्। शुभादिनाम्नि विमान उत्पन्नानां देवानामायुः सागरो–पमद्वयम्।

॥३॥

दण्डत्रयम्–मनोदण्डप्रभृति। एवं गुप्ति-त्रयमपि। शल्यत्रयम्–मायादि। गौरव-त्रयम्–ऋद्ध्यादि। विराधनात्रयम्-ज्ञानविराधनादि। मृगशीर्षप्रभृतिनक्ष-त्राणि त्रितारकाणि। आभङ्करादि-विमानिना–मायुरुत्कर्षतः सागरत्रयम्।

॥४॥

कषायाः–क्रोधादयः। ध्यानानि-आर्त्तादीनि। विकथाः–स्त्रीकथाद्याः। सञ्ज्ञाः–आहाराद्याः। चतुर्विधो बन्धः–

प्रकृतिबन्धादिः। गव्यूतचतुष्कं योजनम्। अनुराधादिनक्षत्राणां तारकचतुष्कम्। कृष्ट्यादिविमानिनामुत्कृष्टमायुः सागरचतुष्कम्।

॥५॥

महाव्रतानि–सर्वतः प्राणातिपाताद्विरमणमित्यादीनि। कामगुणाः–शब्दादयः। आश्रवाः –मिथ्यात्वादयः। संवराः–सम्यक्त्वादयः। समितयः–ईर्यादयः। अस्तिकायाः–धर्मादयः। रोहिणीप्रभृतिनक्षत्राणि पञ्चतारकाणि। वातादिविमानेषूत्कृष्टमायुः सागरपञ्चकम्।

||६||

लेश्याः–कृष्णादयः। जीवनिकायाः–पृथ्वीकायाद्याः। बाह्यतपांसि–अनशनाद्याः। आभ्यन्तरतपांसि–प्रायश्चित्ताद्याः। छाद्मस्थिकसमुद्घाताः–वेदनादयः(केवलिसमुद्घातवर्जाः)। अर्थावग्रहाः–श्रोत्रेन्द्रियार्थावग्रहादयः। कृत्तिकादिनक्षत्राणि षट्तारकाणि। स्वयम्भूप्रभृतिविमानेषूत्कृष्टमायुः सागरषट्कम्।

॥७॥

भयस्थानानि–इहलोकभयादीनि। समुद्धाताः–वेदनादयः। श्रीवीरोच्छ्रयः–सप्तरत्नयः। महानक्षत्रं सप्ततारकम्। समादिविमानेषूत्कृष्टमायुः सागरसप्तकम्।

॥८॥

मदस्थानानि–जातिमदादीनि। प्रवचनमातारः–ईर्यासमित्यादयः। जम्बूद्रुमस्योच्छ्रयो योजनाष्टकम्। एवं कूटश्यामलितरोरपि। जम्बूद्वीपजगत्या

अपि। अष्टसामयिकः केवलिसमुद्धातः। पार्श्वप्रभोरष्टौ गणा गणधराश्च शुभादयः। अर्चिःप्रभृतिविमानेषूत्कृष्टमायुः साग-राष्टकम्।

॥९॥

ब्रह्मगुप्तयो नव। पार्श्वप्रभोरुच्छ्रयो नव रत्नयः। उपरितनतारकं रत्नप्रभापृथ्व्या नवयोजनशतान्युर्ध्वं चरति। पद्मादि-विमानेषूत्कृष्टा स्थितिः सागरनवकम्।

॥१०॥

श्रमणधर्माः–क्षान्त्यादयः। दश चित्त–

समाधिस्थानानि– (१) असमुत्पन्नपूर्वा तस्य धर्मचिन्ता समुत्पद्येत सर्वं धर्मं ज्ञातुम् (२) असमुत्पन्नपूर्वं स्वप्नदर्शनं वा तस्य समुत्पद्येत येन मुक्तिप्राप्त्यादि शुभफलमसौ पश्येत् (३) जातिस्मरणज्ञानं तस्योत्पद्येत (४) देवदर्शनं वोत्पद्येत (५) अवधिज्ञानं वोत्पद्येत (६) अवधिदर्शनं वोत्पद्येत (७) मनःपर्यवज्ञानं वोत्पद्येत (८) केवलज्ञानं वोत्पद्येत (९) केवलदर्शनं वोत्पद्येत (१०) केवलिमरणेन वा म्रियेत। मन्दरमूलविष्कम्भो दश योजनसहस्राणि। श्रीअरिष्टनेमिकृष्ण–

योरुच्छ्रयो दशधनूंषि। रामबलदेवस्य च। ज्ञानवृद्धिकराणि नक्षत्राणि-मृगशीर्षादयः। घोषादिविमानेषूत्कृष्ट-मायुः सागरदशकम्।

॥११॥

उपासकप्रतिमाः- (१) दर्शनश्रावकः (२) कृतव्रतप्रतिकर्म (३) सामायिकस्थः (४) पौषधोपवासविरतः (५) दिने ब्रह्मचारी रात्रौ परिमाणकृत्। (६) दिने रात्रावपि ब्रह्मचार्यस्नानी रात्रिभक्तत्याग्यबद्धकच्छश्च।(७)सचित्तवर्जकः (८) आरम्भवर्जकः (९) प्र-

त्याखातप्रेष्यः (१०) उद्दिष्टभक्तवर्जकः (११) श्रमणभूतः।

श्रीवीरगणधराः–इन्द्रभूत्यादयः। ब्रह्मा–दिविमानेषूत्कृष्टमायुरेकादश सागराः।

॥१२॥

भिक्षुप्रतिमाः– (१) मासिकी भिक्षु–प्रतिमा। एवं यावत् (७) सप्तमा–सिकी भिक्षुप्रतिमा। (८) प्रथमा सप्तरात्रिन्दिवा। एवं यावत् (१०) तृतीया सप्तरात्रिन्दिवा। (११) अहोरात्रिकी भिक्षुप्रतिमा (१२) एकरात्रिकी

भिक्षुप्रतिमा। द्वादशविधः सम्भोगः (सम्–एकीभूय समानसमाचाराणां साधूनां भोजनम्)–उपधिः, श्रुतम्, भक्तपाने, अञ्जलिप्रग्रहः, दानम्, निमन्त्रणम्, अभ्युत्थानम्, वन्दनम्, वैयावृत्त्यम्, समवसरणम्, सन्निषद्या, कथाप्रबन्धश्च। द्वादशावर्त्तं कृतिकर्म–द्व्यवनतादि।

सर्वजघन्या रात्रिर्द्वादशमुहूर्त्तिका। एवं दिवसोऽपि। सर्वार्थसिद्धाद् द्वादशयोजनान्युर्ध्वमिषत्प्राग्भारा पृथ्वी। तस्याश्चेषदादिद्वादशाभिधानानि। महेन्द्रादि–

विमानेषूत्कृष्टा स्थितिर्द्वादश सागराः।

॥१३॥

क्रियास्थानानि–अर्थदण्डादीनि प्राणा–
युपूर्वे त्रयोदश वस्तूनि। वज्रादिविमा–
नेषूत्कृष्टा स्थितिस्त्रयोदश सागराः।

॥१४॥

चतुर्दश भूतग्रामाः–सूक्ष्मापर्याप्तका–
दयः। चतुर्दश पूर्वाः–उत्पादपूर्वादयः।
श्रीवीरश्रमणसम्पत्–चतुर्दशसहस्राणि।
कर्मविशुद्धिमार्गणं प्रतीत्य चतुर्दश
जीवस्थानानि–मिथ्यादृष्टिः सास्वादन–

सम्यग्दृष्टिरित्यादीनि। चक्रिरत्नानि-स्त्रीरत्नादीनि। जम्बूद्वीपे चतुर्दश महानद्यो गङ्गादयः। श्रीकान्तादिविमानेषूत्कृष्टा स्थितिश्चतुर्दश सागराः।

॥१५॥

परमाधार्मिकाः-अम्बादयः। नमि-जिनोच्छ्रयः-पञ्चदशधनूंषि। ध्रुवराहुः प्रतिदिनं चन्द्रस्य पञ्चदशभागं पञ्चदशभागं मण्डलमावृत्य तिष्ठति, तमेव शुक्लपक्षे विमुञ्चति। नन्दा-दिविमानेषूत्कृष्टा स्थितिः पञ्चदश सागराः।

||१६||

गाथाषोडशकानि (सूत्रकृतप्रथमश्रुत-स्कन्धाध्ययनानि) समय इत्यादीनि। कषायाः-अनन्तानुबन्धिक्रोधादयः। मन्दरनामधेयानि-मन्दरो मेरुरित्यादीनि। पार्श्वप्रभोः श्रमणसम्पत् षोडशसहस्रमिता। आत्मप्रवादपूर्वस्य षोडश वस्तूनि। लवणसमुद्र उत्सेधपरिवृद्ध्या षोडश योजनसहस्राणि। आवर्त्तादिविमानेषूत्कृष्टा स्थितिः षोडश सागराः।

||१७||

सप्तदशविधोऽसंयमः–पृथ्वीकायादिपञ्चासंयमाः, द्वित्रिचतुःपञ्चेन्द्रियासंयमाः, अजीवकायासंयमः, प्रेक्षासंयमः, उपेक्षासंयमः, अपहृत्यासंयमः, (अविधिनोच्चारादिपरिष्ठापनम्), अप्रमार्जनाऽसंयमः, मनोवाक्कायासंयमाश्च।

लवणसमुद्रः सप्तदश योजनसहस्राणि सर्वाग्रतः। सप्तदश योजनसहस्राण्युर्ध्वमुत्पत्य ततः पश्चात्तिर्यग्गतिः प्रवर्त्तते चारणानाम्। सप्तदशविधं मरणम्–आवीचि–अवधि–आत्यन्तिक–

वलन्-वशार्त्त-अन्तःशल्य-तद्भव-बाल-पण्डित-बालपण्डित-छद्मस्थ-केवलि-वैहायस-गृध्रस्पृष्ट-भक्त-परिज्ञा-इङ्गिनी-पादपोपगमनमरण-लक्षणम्। सामानादिविमानेषूत्कृष्टा स्थितिः सप्तदश सागराः।

॥१८॥

अष्टादशविधं ब्रह्म-दिव्यौदारिकका-मानां त्रिविधं त्रिविधेन त्यागतः। अरिष्टनेमिप्रभोः श्रमणसम्पद्-अष्टा-दशसहस्राणि। श्रीवीरेण सक्षुल्लकव्यक्त-श्रमणानामष्टादश प्रज्ञप्तानि स्थानानि-

व्रतषट्कादीनि। सचूलिकाचाराङ्गस्या-
ष्टादश पदसहस्राणि।

ब्राह्म्यां लिप्यामष्टादश लेखविधा-
नानि-ब्राह्म्यादीनि। अस्तिनास्तिप्र-
वादपूर्वस्याष्टादश वस्तूनि। कालादि-
विमानेषूत्कृष्टा स्थितिरष्टादश सागराः।

॥१९॥

एकोनविंशतिर्ज्ञाताध्ययनानि-उत्क्षि-
प्तादीनि पुण्डरीकं च। आनतादि-
विमानेषूत्कृष्टा स्थितिरेकोनविंशतिः
सागराः।

||२०||

असमाधिस्थानानि- (१) द्रुतगन्तृत्वम्। स च द्रुतं द्रुतं संयमात्मनिरपेक्षो व्रजन्नात्मानं प्रपतनादिभिरसमाधौ योजयति, अन्याँश्च सत्त्वान् घ्नन्नसमाधौ योजयति। सत्त्ववधजनितेन च कर्म्मणा परलोकेऽप्यात्मानमसमाधौ योजयती-त्येतदसमाधिस्थानम्। एवमन्यत्रापि यथायोगमवगन्तव्यम्। (२) अप्रमा-र्जितचारः (३) दुष्प्रमार्जितचारः (४) अतिरिक्तशय्यासनम् (५) रात्नि-कपराभवः (६) स्थविरोपघातः

(७) भूतोपघातः (८) सञ्ज्वलनम् (प्रतिक्षणरोषः) (९) अत्यन्तक्रोधः (१०) पराङ्मुखस्य परस्यावर्णवादः (११) शङ्कितस्यापि निःसंशयतयाऽ-भीक्ष्णमवधारणम् (१२) अधिकर-णोत्पादनम् (१३) उपशान्तकलहानां पुनरुदीरणम् (१४) सरजस्कपाणि-पादत्वम्। (१५) अकालस्वाध्यायः (१६) कलहहेतुता (१७) शब्दकर्तृत्वम् (१८) गणभेदकर्तृत्वम् (१९) सूरप्र-माणभोजित्वम् (२०) अनेषणाऽप-रिहारश्च।

मुनिसुव्रतजिनोच्छ्रयः विंशतिर्धनूंषि। सर्वघनोदधिबाहल्यं विंशतियोजन-सहस्राणि। प्राणतेन्द्रस्य विंशतिः सामा-निकसाहस्र्यः। नपुंसकवेदनीयक-र्मस्थितिर्विंशतिसागरोपमकोटाको-ट्यः। प्रत्याख्यानपूर्ववस्तूनि विंशतिः। सातादिविमानेषूत्कृष्टा स्थितिर्विंशतिः सागराः।

||२१||

एकविंशतिः शबलाः- (१) हस्तकर्म कुर्वाणः (२) मैथुनप्रतिसेवी (३) रात्रिभोजनकृत् (४) आधाकर्मभोजी

(५) शय्यातरपिण्डभोजी (६) उद्दिष्ट-क्रीताभ्याहृतभोजी (७) अभीक्ष्णं प्रत्याख्यायाशनादि भुञ्जानः (८) षणमासाभ्यन्तरे गणान्तरं सङ्क्रामन् (९) अन्तर्मासस्य त्रिर्नाभिप्रमाणजलावगाही (१०) अन्तर्मासस्य त्रीणि मायास्थानानि सेवमानः (११) राजपिण्डं भुञ्जानः (१२) उपेत्य पृथिव्यादिकं हिंसन् (१३) आकुट्ट्या मृषावादं वदन् (१४) आकुट्ट्याऽदत्तादानं गृह्णन् (१५) आकुट्ट्याऽनन्तर्हितायां पृथ्व्यां कायोत्सर्गादि कुर्वन् (१६) अन्यस्मिंश्च तथाप्रकारे सप्राणे

सबीजादौ स्थानादि कुर्वन् (१७) आकुट्या सचित्तपृथ्व्या-मावासं कुर्वन् (१८) आकुट्या मूलकन्दादि भुञ्जानः (१९) अन्तः संवत्सरस्य दशोदकलेपान् कुर्वन् (२०) अन्तः संवत्सरस्य दश मायास्थानानि सेवमानः (२१) शीतो-दकव्याप्तेन हस्तेनाभीक्ष्णमशनादि प्रगृह्य भुञ्जानश्च।

समाद्वयमेकविंशतिवर्षसहस्रमितम्-दुःषमा दुःषमदुःषमा च। श्रीवत्सा-दिविमानेषु स्थितिरेकविंशतिः सागराः।

॥२२॥

परीषहाः–बुभुक्षादयः। दृष्टिवादस्य द्वाविंशतिसूत्राणि छिन्नछेदनयिकानि स्वसमयसूत्रपरिपाट्याम्, द्वाविंशतिर-च्छिन्नछेदनयिकानि, तानि चाजीविक-सूत्रपरिपाट्याम्, त्रिकनयिकानि त्रैरा-शिकसूत्रपरिपाट्याम्, चतुष्कनयि-कानि समयसूत्रपरिपाट्याम्। द्वाविंश-तिविधः पुद्गलपरिणामः–कालवर्ण-परिणाम इत्यादिः। महितादिविमाने-षूत्कृष्टा स्थितिर्द्वाविंशतिः सागराः।

## ॥२३॥

त्रयोविंशतिः सूत्रकृताङ्गाध्ययनानि समयादीनि। त्रयोविंशतिजिनानां कैवल्योत्पत्तिः सूर्योदयमुहूर्त्ते बभूव। त्रयोविंशतिस्तीर्थङ्कराः पूर्वभव एकादशाङ्गिनो बभूवुः, चतुर्दशपूर्वधरस्तु ऋषभदेवः। एवं त्रयोविंशतिः प्राग्भवे मण्डलिकराजानः, चक्री तु ऋषभदेवः। अधस्तनग्रैवेयकेषूत्कृष्टा स्थितिस्त्रयोविंशतिः सागराः।

||२४||

चतुर्विंशतिर्देवाधिदेवाः–ऋषभादयः। चतुर्विंशतिर्देवस्थानानि सेन्द्रानि। अधस्तनमध्यमग्रैवेयकेषूत्कृष्टा स्थितिश्चतुर्विंशतिः सागराः।

||२५||

पूर्वपश्चिमजिनयोः पञ्चयामस्य भावनाः पञ्चविंशतिः। श्रीमल्लिजिनोच्छ्रयः–पञ्चविंशतिर्धनूंषि। सर्वेऽपि दीर्घवैताढ्याः पञ्चविंशतियोजनान्युच्छ्रयेण पञ्चविंशतिगव्यूतानि चोद्वेधेन।

आचारस्य भगवतः सचूलिकस्य पञ्चविंशत्यध्ययनानि–शस्त्रपरिज्ञा–दीनि। गङ्गादिप्रपाते तत्पृथुत्वम्–पञ्चविंशतिगव्यूतानि। लोकबिन्दुसा–रपूर्वस्य वस्तूनि पञ्चविंशतिः। अधस्तनोपरितनग्रैवेयकेषूत्कृष्टा स्थितिः पञ्चविंशतिः सागराः।

॥२६॥

दशा[१०]–कल्प[६]–व्यवहारा[१०]णामुद्देशन–कालाः षड्विंशतिः। अभव्यानां मोहनीयस्य षड्विंशतिप्रकृतयः सत्तां बिभ्रति (सम्यक्त्वमिश्रवर्जाः)।

मध्यमाधस्तनग्रैवेयकेषूत्कृष्टा स्थितिः षड्विंशतिः सागराः।

॥२७॥

सप्तविंशतिरनगारगुणाः-पञ्च महाव्रतानि पञ्चेन्द्रियनिग्रहः कषायचतुष्टयविवेको भाव-करण-योगसत्यानि क्षमा विरागता मनो-वाक्-कायसमाहरणता ज्ञान-दर्शन-चारित्रसम्पन्नता वेदनातिसहनता मारणान्तिकातिसहनता च। वेदकसम्यक्त्वबन्धोद्वलकस्य सप्तविंशतिप्रकृतयो मोहनीयसत्काः सत्तायां

भवन्ति। मध्यमग्रैवेयकेषूत्कृष्टा स्थितिः सप्तविंशतिः सागराः।

||२८||

अष्टाविंशतिविध आचारप्रकल्पः-मासिक्यारोपणादिः। एकेषां भवसि-द्धिकानां मोहनीयस्याष्टाविंशतिप्रकृ-तयः सत्तां बिभ्रति। आभिनिबोधिक-ज्ञानमष्टाविंशतिविधम्-श्रोत्रेन्द्रिया-र्थावग्रहादि। ईशानेऽष्टाविंशतिलक्ष-विमानानि। मध्यमोपरितनग्रैवेयके-षूत्कृष्टा स्थितिरष्टाविंशतिः सागराः।

||२१||

एकोनत्रिंशद्विधः पापश्रुतप्रसङ्गः- भौमम्, उत्पातम्, स्वप्नम्, अन्तरिक्षम्, अङ्गम्, स्वरम्, व्यञ्जनम्, लक्षणं चेत्येतानि सूत्र-वृत्तिवार्त्तिक-भेदाच्चतुर्विंशतिः। तथा विकथानुयोगः, विद्यानुयोगः, मन्त्रानुयोगः, योगानुयोगः, अन्यतीर्थि-कप्रवृत्तानुयोगश्च। आषाढ-भाद्रपद-कार्त्तिक-पौष-फाल्गुन-वैशाख-मासेष्वेकोनत्रिंश-दहोरात्राणि। उपरितनाधस्तनग्रैवेयके-षूत्कृष्टा स्थितिरेकोन-त्रिंशत्ः सागराः।

||३०||

त्रिंशन्मोहनीयस्थानानि– (१) यस्त्रसान् प्राणान् वारिमध्ये विगाह्योदकेन शस्त्रभूतेन पादादिनाऽऽक्रम्य मारयति, स मार्यमाणस्य महामोहोत्पादकत्वात् सङ्क्लिष्टचित्तत्वाच्च भवशतदुःखवे– दनीयमात्मनो महामोहं प्रकरोति। एवं त्रसमारणेनैकं मोहनीयस्थानम्, एवं सर्वत्र।

(२) शीर्षावेष्टेन वेष्टयित्वा मारयति। (३) पाणिना मुखं स्थगयित्वाऽन्तर्नदन्तं मारयति। (४) अग्निं प्रज्वाल्यावरुध्य

मारयति। (५) प्रकृष्टप्रहारतो मस्तकादि विदारयति। (६) मायया हत्वोपहसति। (७) गूढाचारी मायां मायया छादयेत्। (८) स्वयमकर्म कृत्वाऽन्यं ध्वंसयति। (९) अनुपरतकलहोऽनृतं जानानोऽपि सत्यानृतानि भाषते। (१०) अमात्यो राजदारा ध्वंसयित्वा विपुलं विक्षोभ्य सामन्तादिपरिकरभेदेन स्वयं राज्या-द्यधिष्ठाय प्राभृतेनानुलोमैः करुणैश्च वचनैरनुकूलयितुमुपस्थितं प्रतिलोम-वाग्भिर्भोगभोगान् विदारयति।

(११) स्त्र्यायत्तोऽकुमारभूतो यो वदेत्

कुमारभूतोऽहम्। (१२) अब्रह्मचारी यो ब्रह्मचार्यहमिति वदेत्, स्त्रीविषय-गृद्ध्या बहुशो मायामृषा भाषते, स आत्मनोऽ-हितः प्रकरोति महामोहम्। (१३) स्वाश्रयभूतराजादिवित्ते लुभ्यति (१४) यदाश्रयेण स्वयं धनीभूतस्त-दिर्ष्यया तज्जीविताद्यन्तरायं करोति। (१५) सर्पी यथाऽण्डकसमूहमेवं पोष-यितारं राजादिं विहिनस्ति। (१६) राष्ट्र-महत्तरादिकं हन्ति। (१७) द्वीपाद्युपमं बहुजननेतारं प्रावचनिकादिपुरुषं हन्ति। (१८) प्रविव्रजिषुं प्रव्रजितं सुतप-स्विनं जगज्जीवनं संयतं बलाद् धर्माद्

भ्रंशयति। (१९) अनन्तज्ञानदर्शनानां जिनानामवर्णवादं विधत्ते। (२०) सद्द-र्शनादिमोक्षमार्गं निन्दन् तस्यापकारं करोति। (२१) यदाचार्यादेः श्रुतचारित्रे गृहीते, तन्निन्दां करोति। (२२) नाचा-र्यादीन् सम्यक् प्रतितर्प्पयति, स्तब्धश्च भवति। (२३) अबहुश्रुतोऽप्यात्मानं बहुश्रुततया वदति। (२४) अतपस्व्य-प्यात्मानं तपस्वितया वदति। (२५) सत्यपि सामर्थ्ये उपेक्षते ग्लानम्, ममाप्येष न करोतीत्याद्यभिप्रायेण। (२६) ज्ञानादिनाशाय कथाधिकरणानि प्रयुङ्क्ते। (२७) श्लाघादिहेतोरधार्मि-

कयोगान् पुनः पुनः प्रयुङ्क्ते। (२८) मानुष्यादिभोगेष्वतृप्यन्नभिलषति। (२९) ऋद्ध्यादियुतदेवानामवर्णवादं करोति। (३०) देवादीनपश्यन्नपि तान् पश्यामीति जिनस्येव पूजार्थी ब्रूते।

मण्डितपुत्रस्स्थविरस्त्रिंशद्वर्षाणि श्रामण्यपर्यायं प्रतिपाल्य सिद्धः। एकमहोरात्रं त्रिंशन्मुहूर्त्तम्, तानि च मुहूर्त्तानि रौद्राद्यभिधानानि सूर्योदयादारभ्य भवन्ति। अरजिनोच्छ्रयः–त्रिंशद्धनूंषि। पार्श्ववीरजिनयोर्गृहिपर्यायः–त्रिंशद्वर्षाणि। उपरितनमध्यमग्रैवेयकेषूत्कृष्टा स्थिति–

स्त्रिंशत् सागराः।

॥३१॥

एकत्रिंशत् सिद्धादिगुणाः(सिद्धत्व-प्रथमसमय एव गुणाः)-आभिनिबोधिकज्ञानावरणादिक्षयरूपाः। उपरितनोपरितनग्रैवेयकेषूत्कृष्टा स्थितिः-एकत्रिंशत् सागराः।

॥३२॥

द्वात्रिंशद्योगसङ्ग्रहाः- (१) आलोचना (२) निरपलापः (आचार्यस्यापरिस्राविता) (३) आपत्सु दृढधर्मता

(४) परसाहाय्यानपेक्षं तपः (५) शिक्षा (६) निष्प्रतिकर्मता (७) तपसोऽज्ञातता (८) अलोभता (९) तितिक्षा (१०) ऋजुता (११) संयमः (१२) सम्यग्दर्शनशुद्धिः (१३) समाधिः (१४) आचारोपगतता (१५) विनयो-पगतता (१६) अदीनता (१७) संवेगः (१८) निर्मायता (१९) सदनुष्ठानम् (२०) संवरः (२१) आत्मदोषनिरोधः (२२) समस्तविषयवैमुख्यम् (२३) मू-लगुणविषयं प्रत्याख्यानम् (२४) उत्त-रगुणविषयं प्रत्याख्यानम् (२५) व्युत्सर्गः

(२६) अप्रमादः (२७) प्रतिक्षणं सामाचार्यनुष्ठानम् (२८) ध्यानसंवरयोगः (२९) मारणान्तिकवेदनोदयेऽप्यक्षोभता (३०) सङ्गपरिज्ञा (३१) प्रायश्चित्तकरणम् (३२) मरणान्त आराधना च।

द्वात्रिंशदिन्द्राः-चमरेन्द्रादयः-(षोडशव्यन्तरेन्द्राणामणपण्णीकादिषोडशेन्द्राणां चाल्पर्द्धिकतयाऽविवक्षा)। सौधर्मकल्पे द्वात्रिंशल्लक्षविमानानि। द्वात्रिंशद्विधं नाट्यम्। विजयादिष्वेकेषां स्थितिर्द्वात्रिंशत् सागराः।

||३३||

त्रयस्त्रिंशदाशातनाःशैक्षो रात्निकस्याऽऽसन्नं गन्ता भवति, आशातना शैक्षस्येत्यादयः। सर्वार्थसिद्धविमानिनामजघन्यानुत्कृष्टा स्थितिस्त्रयस्त्रिंशत् सागराः।

||३४||

चतुस्त्रिंशद् बुद्धातिशयाः–अवस्थितकेशादिप्रभृतयः। जम्बूद्वीपे चतुस्त्रिंशच्चक्रिविजयाः–द्वात्रिंशन्महाविदेहे द्वौ भरतैरवतौ। जम्बूद्वीप उत्कृष्टतश्चतुस्त्रिंशत्तीर्थकराः समुत्पद्यन्ते।

॥३५॥

पञ्चत्रिंशत् सत्यवचनातिशयाः- संस्कारवत्त्वादयः। कुन्थुजिनोच्छ्रयः- पञ्चत्रिंशद्धनूंषि। दत्तवासुदेव-नन्दन-बलदेवोच्छ्रयश्च। सौधर्मकल्पे सुधर्म्म-सभायां माणवके चैत्यस्तम्भेऽध उपरि चार्धत्रयोदशार्धत्रयोदश योजनानि वर्जयित्वा मध्ये पञ्चत्रिंशद्योजनेषु वज्रमयेषु वृत्तसमुद्गकेषु जिनसक्थीनि प्रज्ञप्तानि।

॥३६॥

उत्तराध्ययनानि षट्त्रिंशत्-विनयश्रु-

तादीनि। श्रीवीरस्य श्रमणीसम्पत्-षट्त्रिंशत्सहस्राणि।

॥३७॥

कुन्थुजिनस्य गणा गणधराश्च सप्तत्रिंशत्

॥३८॥

पार्श्वजिनस्य श्रमणीसम्पत्-अष्टत्रिंश-त्सहस्राणि

॥३९॥

नमिजिनस्यावधिज्ञानिशतानि-एको-नचत्वारिंशत्

||४०||

अरिष्टनेमिजिनश्रमणीसहस्राणि चत्वा-
रिंशत्

||४१||

नमिजिनश्रमणीसहस्राणि-एकचत्वा-
रिंशत्।

||४२||

श्रीवीरश्रामण्यपर्यायः-साधिकद्विच-
त्वारिंशद्वर्षाणि। कालोदसागरे द्विच-
त्वारिंशच्चन्द्राः सूर्याश्च। नामकर्म
द्विचत्वारिंशद्विधम्-गतिनामादि। लव-

णसमुद्रे द्विचत्वारिंशन्नागसहस्राणि धारयन्त्यभ्यन्तरवेलाम्।

॥४३॥

त्रिचत्वारिंशत्कर्मविपाकाध्ययनानि।

॥४४॥

चतुश्चत्वारिंशद् देवलोकच्युताभाषितानि ऋषिभाषिताध्ययनानि।

॥४५॥

पञ्चचत्वारिंशल्लक्षयोजनमितः सीमन्तकनरकः, उडुविमानम्, इषत्प्राग्भारा

पृथ्वी, समयक्षेत्रं च। धर्मजिनोच्छ्रयः-पञ्चचत्वारिंशद्धनूंषि।

।।४६।।

दृष्टिवादस्य षट्चत्वारिंशन्मातृकापदानि। ब्राह्मीलिप्यां मातृकाक्षराणि षट्चत्वारिंशत्।

।।४७।।

अग्निभूतिस्थविरगृहिपर्यायः-सप्तचत्वारिंशद्वर्षाणि।

।।४८।।

चक्रिणः पट्टनसहस्राणि-अष्टचत्वारिंशत्।

||४९||

देवकुरुत्तरकुर्वोर्मनुष्या एकोनपञ्चाश-
द्रात्रिदिवसैः सम्पन्नयौवना भवन्ति।
त्रीन्द्रियोत्कृष्टस्थितिः-एकोनपञ्चाश-
द्रात्रिदिवसाः।

||५०||

मुनिसुव्रतजिनश्रमणीसहस्राणि पञ्चा-
शत्। अनन्तजिन-पुरुषोत्तम-वासुदे-
वयोरुच्छ्रयः पञ्चाशद्धनूंषि। लान्तके
पञ्चाशद् विमानावाससहस्राणि।

||५२||

मोहनीयस्य द्विपञ्चाशन्नामधेयानि-क्रोधकोपादीनि।

||५३||

श्रीवीरस्य त्रिपञ्चाशदनगाराः संवत्सरपर्यायाः पञ्चस्वनुत्तरेषूत्पन्नाः।

||५४||

प्रत्येकावसर्पिण्यादौ चतुःपञ्चाशदुत्तमपुरुषाः समुत्पद्यन्ते-चतुर्विंशतिस्तीर्थकराः, द्वादश चक्रिणः, नव वासुदेवाः, बलदेवाश्च नव। अरिष्टने-

मिजिनछद्मस्थपर्याय:-चतु:पञ्चाश-द्रात्रिदिवसा:। श्रीवीरेणैकदिवसेनै-कनिषद्यया चतु:पञ्चाशद् व्याक-रणानि व्याकृतानि। अनन्तजिनगणध-राश्चतु:पञ्चाशत्।

॥५५॥

मल्लिजिनायु:-पञ्चपञ्चाशद्वर्षसह-स्राणि। श्रीवीरोऽन्तिमरात्रौ पञ्चपञ्चा-शदध्ययनानि कल्याणफलविपाकानि तावन्ति च पापफलविपाकानि व्याकृत्य सिद्धः।

||५६||

विमलजिनस्य गणा गणधराश्च-षट्पञ्चाशत्

||५७||

मल्लिजिनमन:पर्यवज्ञानिन:-सप्तपञ्चाशच्छतानि।

||५९||

सम्भवजिनगृहिपर्याय:-एकोनषष्टि-पूर्वलक्षाणि। मल्लिजिनावधिज्ञानिन:-एकोनषष्टिशतानि।

||६०||

षष्ट्या षष्ट्या मुहूर्त्तैः सूर्य एकैकं मण्डलं निष्पादयति। षष्टिनागसहस्राणि लवणसमुद्रस्याग्रोदकं धारयन्ति। विमलजिनोच्छ्रयः–षष्टिधनूंषि।

||६२||

वासुपूज्यजिनस्य गणा गणधराश्च–द्वाषष्टिः। शुक्लपक्षस्य चन्द्रो दिवसे दिवसे द्वाषष्टिभागान् परिवर्द्धते, परिहीयते च कृष्णपक्षे।

||६३||

ऋषभजिनमहाराजपर्यायः–त्रिषष्टिल–क्षपूर्वाणि। हरिवर्षरम्यक्क्षेत्रयोर्मनुष्या–स्त्रिषष्टिरात्रिदिवसैः सम्प्राप्तयौवना भवन्ति। निषधपर्वते त्रिषष्टिः सूर्यो–दयस्थानानि, एवं नीलवत्पर्वतेऽपि।

||६४||

सर्वेऽपि दधिमुखपर्वताः पल्यङ्क–संस्थिताः सर्वत्र समा मूलादिषु दशसहस्रविष्कम्भा उत्सेधेन चतुः–षष्टियोजनसहस्रोच्चाः। सर्वस्यापि

चक्रिणश्चतुःषष्टियष्टिको महार्घ्यो मुक्तामणिमयो हारः प्रज्ञप्तः

॥६५॥

मौर्यपुत्रस्थविरगृहिपर्यायः–पञ्चषष्टि–वर्षाणि।

॥६६॥

श्रेयांसजिनस्य गणा गणधराश्च षट्षष्टिः

॥६८॥

विमलजिनश्रमणाः–अष्टषष्टिसहस्राणि

||७०||

श्रीवीरः सविंशतिदिन–मासे व्यतिक्रान्ते सप्तत्यां च रात्रिदिवसेषु शेषेषु (भाद्रपदशुक्लपञ्चम्याम्) वर्षावासं परिवसति। श्रीपार्श्वश्रामण्यपर्यायः–सप्ततिवर्षाणि। श्रीवासुपूज्यजिनोच्छ्रयः –सप्ततिधनूंषि।

||७१||

अजितजिनगृहिपर्यायः–एकसप्तति–पूर्वलक्षाणि। एवं सगरचक्रिगृहिपर्या–योऽपि।

||७२||

द्विसप्ततिनागसाहस्र्यो लवणसमुद्रस्य वेलां (षोडशसहस्रप्रमाणामुत्सेधतो विष्कम्भतश्च दशसहस्रमानां लवण-जलधिशिखां) बाह्यां (धातकीखण्ड-द्वीपाभिमुखीं) धारयन्ति। श्रीवीरायुः द्विसप्ततिवर्षाणि। प्रत्येकचक्रिणो द्वासप्ततिपुरवरसाहस्र्यः। द्विसप्ततिकलाः-लेख-गणिताद्याः।

||७४||

अग्निभूतिगणधरायुः-चतुःसप्ततिवर्षाणि

||७५||

शीतलजिनगृहिपर्यायः-पञ्चसप्तति-पूर्वसहस्राणि। शान्तिजिनगृहिपर्यायः-पञ्चसप्ततिवर्षसहस्राणि।

||७७||

अङ्गवंशात् सप्तसप्ततिराजानः प्रव्रजिताः। सप्तसप्ततिलवाग्रेणः मुहूर्त्तम्।

||७८||

अकम्पितस्थविरायुः-अष्टसप्ततिव-र्षाणि। वैश्रमणोऽष्टसप्ततिसुवर्णकुमार-

द्वीपकुमारावासलक्षाणां स्वामी।

॥८०॥

श्रेयांसजिनोच्छ्रयः–अशीतिधनूंषि। एवं त्रिपृष्ठवासुदेव–अचलबलदेवयो–रप्युच्छ्रयः।

॥८१॥

कुन्थुजिनमनःपर्यवज्ञानिशतानि–एकाशीतिः। व्याख्याप्रज्ञप्त्यामेकाशी–तिर्महायुग्मशतानि।

॥८२॥

द्व्यशीत्यधिकं मण्डलशतं सूर्यो द्विकृत्वः

प्रविश्य चारं चरति, तद्यथा जम्बू-द्वीपान्निष्क्रामन्, तत्र प्रविशंश्च। किल चतुरशीत्यधिकं सूर्यमण्डलशतं भवति, तत्र सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले सकृदेव सङ्क्रामति, शेषाणि तु द्वौ वारौ। श्रीवीरोः द्व्यशीतिरात्रिदिनै-र्व्यतिक्रान्तैर्गर्भाद् गर्भं संहृतः।

॥८३॥

शीतलजिनस्य गणा गणधराश्च त्र्यशीतिः। मण्डितपुत्रस्थविरायुः-त्र्यशीतिवर्षाणि। ऋषभजिनगृहिपर्यायः-त्र्यशीतिपूर्वलक्षाणि। भरतराजा

त्र्यशीतिपूर्वलक्षाण्यगारेऽध्युष्य जिनो बभूव।

॥८४॥

चतुरशीतिलक्षाणि नरकावासाः। ऋषभजिनायुः-चतुरशीतिपूर्वलक्षाणि। एवं भरत-बाहुबलि-ब्राह्मी-सुन्दरीणामप्यायुः। श्रेयांसजिनायुः-चतुरशीतिवर्षलक्षाणि। त्रिपृष्ठवासुदेवश्चतुरशीतिवर्षलक्षाणि सर्वायुः पालयित्वाऽप्रतिष्ठाने नरके नैरयिकतयोत्पन्नः। सर्वेषामञ्जनपर्वतानामुच्छ्रयः-चतुरशीतियोजनसहस्राणि। व्याख्याप्रज्ञप्त्यां चतुरशीतिपदसहस्राणि। चतुरशीतिः

प्रकीर्णकसहस्राणि। चतुरशीतिः योनि-लक्षाणि। पूर्वादिकानां शीर्षप्रहेलिका-पर्यवसानानां स्वस्थानात्-उत्तरोत्तरस्य सङ्ख्यास्थानस्योत्पत्तिस्थानात् सङ्-ख्याविशेषलक्षणाद् गुणनीयाच्चतुर-शीत्या गुणकारः प्रज्ञप्तः। ऋष-भजिनश्रमणसाहस्र्यः चतुरशीतिः। सर्वविमानसङ्ख्या-चतुरशीतिलक्षाणि सप्तनवतिसहस्राणि त्रयोविंशतिश्च।

॥८५॥

धातकीखण्डमन्दरोच्छ्रयः-पञ्चाशी-तियोजनसहस्राणि। एवं रुचकपर्वतो-

च्छ्रयोऽपि।

॥८६॥

सुविधिजिनस्य गणा गणधराश्च-षडशीतिः।

॥८८॥

दृष्टिवादस्याष्टाशीतिसूत्राणि-ऋजुसूत्रादीनि।

॥८९॥

ऋषभजिनस्तृतीयसमापश्चिमभाग एकोनवतिपक्षेषु शेषेषु कालगतः। श्रीवीरश्च तुर्यसमापश्चिमभाग एकोनवतिपक्षेषु शेषेषु कालगतः। शान्ति-

जिनस्यार्यासाहस्र्यः–एकोनवतिः।

॥९०॥

शीतलजिनोच्छ्रयः–नवतिधनूंषि। अजितजिनस्य गणा गणधराश्च–नवतिः। शान्तिजिनस्याप्येवम्।

॥९१॥

परवैयावृत्यकर्मप्रतिमाः–एकनवतिः

॥९२॥

श्रीइन्द्रभूतिगणधरायुः–द्विनवतिवर्षाणि।

||९३||

चन्द्रप्रभार्हतस्त्रिनवतिर्गणा गणधराश्च। शान्तिजिनस्य त्रिनवतिश्चतुर्दशपूर्व्वि-शतानि

||९४||

अजितजिनस्यावधिज्ञानिशतानि-चतुर्नवतिः

||९५||

सुपार्श्वजिनस्य पञ्चनवतिर्गणा गणध-राश्च। कुन्थुजिनायुः-पञ्चनवतिवर्षस-हस्राणि। मौर्यपुत्रस्थविरायुः-पञ्चन-वतिवर्षाणि

||९६||

प्रत्येकचक्रिणः षण्णवतिग्रामकोटयः

||९९||

मन्दरस्योर्ध्वमुच्छ्रयः–नवनवतियोजनसहस्राणि।

||१००||

सुविधिजिनोच्छ्रयः–धनुःशतम्। पार्श्वजिनायुः–वर्षशतम्। आर्यसुधर्मायुश्च।

||१५०||

चन्द्रप्रभजिनोच्छ्रयः सार्धधनुःशतम्।

||२००||

सुपार्श्वजिनोच्छ्रय:–धनु:शतद्वयम्।

||२५०||

पद्मप्रभजिनोच्छ्रय:–सार्धधनु:शत-द्वयम्।

||३००||

सुमतिजिनोच्छ्रय:–धनु:शतत्रयम्। अरिष्टनेमिजिनगृहिपर्याय:–वर्षशत-त्रयम्। वैमानिकदेवानां विमानप्राका-राणामुच्छ्रय:–योजनशतत्रयम्। श्रीवी-रश्रुतकेवलिन: शतत्रयम्। पञ्चधनु:श-

तिकस्यान्तिमशरीरिणः सिद्धिगतस्या-वगाहना-साधिकधनुःशतत्रयम्।

।।३५०।।

पार्श्वजिनश्रुतकेवलिनः-सार्धशतत्रयम्। अभिनन्दनजिनोच्छ्रयः-सार्धधनुःशत-त्रयम्।

।।४००।।

सम्भवजिनोच्छ्रयः-धनुःशतचतुष्टयम्। सर्वेऽपि निषधनीलवत्पर्वतानामुच्छ्रयो योजनशतचतुष्कम्, उद्वेधश्च गव्यू-तशतचतुष्कम्। श्रीवीरवादिसम्पत्-शतचतुष्टयम्।

||४५०||

अजितजिन–सगरचक्रिणोरुच्छ्रयः–
अर्धपञ्चमधनुःशतानि।

||५००||

ऋषभजिनभरतचक्रिणोरुच्छ्रयः–प–
ञ्चधनुःशतानि

||६००||

पार्श्वजिनवादिशतानि–षट्। वासुपूज्य–
जिनो षड्भिः पुरुषशतैः सह प्रव्रजितः

||७००||

श्रीवीरकेवलिशतानि–सप्तवैक्रियशतानि च। अरिष्टनेमिजिनो देशोनसप्तशतवर्षाणि केवलिपर्यायं प्राप्य सिद्धः।

||८००||

श्रीवीरानुत्तरोपपातिकसम्पत्–अष्टशतानि। अरिष्टनेमिजिनवादिसम्पच्च।

||१०००||

सर्वग्रैवेयकविमान–सर्वयमकपर्वत–चित्रविचित्रकूट–सर्ववृत्तवैताढ्यसर्व–हरिहरिसहकूटाः (वक्षस्कारकूटवर्जाः)–

सर्वबलकूटाः (नन्दनकूटवर्जाः) उर्ध्व-मुच्चत्वेन दश दश योजनशतानि प्रज्ञप्ताः। अरिष्टनेमिजिनायुः-दश वर्षशतानि। पार्श्वार्हतो जिनानां दश शतानि। पार्श्वशिष्या दशशतमिताः सिद्धाः। पद्महृद-पुण्डरीकहृदयोरायामो दश योजनशतानि।

॥११००॥

पार्श्वजिनवैक्रियशतानि-एकादश

॥९०००॥

अजितजिनावधिज्ञानिसहस्राणि नव

||१००००००||

श्रीवीरस्तीर्थकरभवग्रहणात् षष्ठे पोट्टिलभव एककोटिवर्षश्रामण्यपर्यायं प्राप्य सहस्रारकल्पे सर्वार्थविमाने देवतयोत्पन्नः।

||१०००००००००००००००||

ऋषभवीरजिनयोरन्तरमेककोटाकोटिसागरोपमाणि।

द्वादशाङ्गं गणिपिटकम्–आचारादि। (१) आचारे श्रमणानां निर्ग्रन्थानामाचारगोचरविनयादय आख्यायन्ते। स

समासतः पञ्चविधः–ज्ञानाचारादिः। आचारस्य परीता वाचना, नानन्ता, आद्यन्तोपलब्धेः। तथा सङ्ख्येयान्य–नुयोगद्वाराणि–उपक्रमादीनि, अध्यय–नानामेवासङ्ख्येयाः प्रतिपत्तयः–मतान्तराणि अभिग्रहविशेषा वा। तथा सङ्ख्येया वेष्टकाः (छन्दोविशेषाः)। सङ्ख्येयाः श्लोकाः (अनुष्टुप्छन्दांसि)। तथा सङ्ख्याता निर्युक्तयः।

तच्चाङ्गार्थतया प्रथममङ्गम्, द्वौ श्रुतस्कन्धौ, पञ्चविंशतिरध्ययनानि, पञ्चाशीतिरुद्देशनकालाः, पञ्चाशीतिः

समुद्देशनकालाः, अष्टादश पदसहस्राणि पदाग्रेण, सङ्ख्येयान्यक्षराणि, अनन्ता गमाः (अर्थपरिच्छेदाः), अनन्ताः पर्यायाः (स्वपरभेदभिन्ना अक्षरार्थपर्यायाः), परित्तास्त्रसा आख्यायन्ते, तेषामानन्त्याभावात्। अनन्ताश्च स्थावराः।

एते च शाश्वताः, द्रव्यार्थतया कृताः, पर्यायार्थतया निबद्धाः, सूत्र एव ग्रथितत्वात्। निकाचिताः, निर्युक्ति-सङ्ग्रहणिहेतूदाहरणादिभिः प्रतिष्ठितत्वात्। जिनैः प्रज्ञप्ता भावा आख्यायन्ते-सामान्यविशेषाभ्यां कथ्यन्ते, प्रज्ञाप्य-

न्ते–नामादिभेदाभिधानेन, प्ररूप्यन्ते–नामादिस्वरूपकथनेन, दर्श्यन्ते–उपमामात्रतः, निदर्श्यन्ते–हेतुदृष्टान्तोपन्यासेन, उपदर्श्यन्ते–उपनयनिगमनाभ्यां सकलनयाभिप्रायतो वा।

सोऽस्मिन् भावतः सम्यगधीते सत्येवमात्मा भवति, तदुक्तक्रियापरिणामाव्यतिरेकात् स एव भवतीत्यर्थः। एवं ज्ञाता भवति यथैवैहोक्तम्। एवं विज्ञाता भवति–तन्त्रान्तरीयज्ञातृभ्यः प्रधानतरो भवति। एवं चरणकरणप्ररूपणाऽऽख्यायते। सोऽयमाचारः।

(२) सूत्रकृते स्वपरसमयादय: सूच्यन्ते। अचिरकालप्रव्रजिता: कुसमयमोहिता: श्रमणा अनेन स्वसमये स्थाप्यन्ते। परसमयनि:सारतां प्रदर्श्य स्वसमयाप्रतिक्षेपणीयतोपदर्श्यते। मोक्षपथावतारकौ, उदारौ, अज्ञानतमोदुर्गतत्त्वमार्गेषु दीपभूतौ, सिद्धिसुगतिगृहोत्तमस्य सोपानानीवास्य नि:क्षोभनिष्प्रकम्पौ सूत्रार्थौ। तत्त्वाङ्गार्थतया द्वितीयमङ्गम्, द्वौ श्रुतस्कन्धौ, त्रयोविंशतिरध्ययनानि, त्रयस्त्रिंशदुद्देशनकाला:, त्रयस्त्रिंशत्समुद्देशनकाला:, षट्त्रिंशत्पदसहस्राणि

पदाग्रेण। शेषं प्राग्वत्।

(३) स्थानेन स्वसमयादयः स्थाप्यन्ते। शैला नद्यः समुद्राः सूर्या भवनानि चन्द्रादिविमानानि आकरा निधयः पुरुषप्रकाराः स्वरा गोत्राणि ज्योतिःसञ्चलनानि च स्थाप्यन्ते। एकविधवक्तव्यं प्रथमेऽध्ययने यावद् दशविधवक्तव्यं दशमेऽध्ययने स्थाप्यते।

तच्चाङ्गार्थतया तृतीयमङ्गम्, एकः श्रुतस्कन्धः, दशाध्ययनानि, एकविंशत्युद्देशनकालाः, द्विसप्ततिपदसहस्राणि पदाग्रेण। शिष्टं प्राग्वत्।

(४) समवायेन स्वसमयादयः सूच्यन्ते। एकादिकानामर्था–नामेकोत्तरपरिवृ–द्धया निरूपणं क्रियते। जगज्जीवहितस्य भगवतो द्वादशाङ्गस्य गणिपिटकस्य समासतः समवतार आख्यायते। तथा नारकादीनामाहारादयो विविधा जीवयोनिर्मन्दरादीनां विष्कम्भादयः कुलकरतीर्थकरगणधरचक्रि–वासुदेव–बलदेवा भरतादिक्षेत्राणि च निरूप्यन्ते।

तच्चाङ्ग। र्थतया तुर्यमङ्गम्, एकमध्ययनम्, एकः श्रुतस्कन्धः, एक उद्देशनकालः, चतुश्चत्वारिंशत्पदसहस्राणि। शिष्टं प्राग्वत्।।

(५) व्याख्यया स्वसमयादयो व्याख्या-यन्ते। नानाविधसुरनरेन्द्रराजर्षिभिः पृष्टानां संशयानां जिनेन विस्तरेण भाषितानां द्रव्यादिप्रकाशकानां लोका-लोकप्रकाशितानां रुद्रसंसाराब्ध्युत्त-रणसमर्थानां सुरपतिसम्पूजितानाम-भिनन्दित-भव्यहृदयानां तमोरजोवि-ध्वंसकानां मतिबुद्धिवर्धकानां षट्त्रिं-शत्सहस्रव्याकरणानां शिष्यहितार्थानां गुणोत्सवार्थानां बहुप्रकारश्रुतार्थानां प्रकाशनमत्र क्रियते।

तच्चाङ्गार्थतया पञ्चममङ्गम्, एकः

श्रुतस्कन्धः, एकं साधिकमध्ययनशतम्, दशोद्देशकसाहस्र्यः, दश समुद्देशक-साहस्र्यः, षट्त्रिंशद्व्याकरणसहस्राणि, चतुरशीतिः पदसहस्राणि पदाग्रेण। शिष्टं प्राग्वत्।

(६) ज्ञाताधर्मकथासु ज्ञातानां नगरादयो धर्माचार्यादयः प्रव्रज्याप्रभृतयो देव-लोकगमन-सुकुलप्रत्यायाति-बोधि-लाभा अन्तक्रियाश्चाऽऽख्यायन्ते।परीष-हादिपराजितानां प्रव्रजितानां भवभ्रमणं तदितरेषां च स्वर्गापवर्गगमनं चात्रोच्यते।

तच्चाङ्गार्थतया षष्ठमङ्गम्, द्वौ श्रुतस्कन्धावेकोनविंशतिरध्ययनानि। चरितानि कल्पितानि चात्र ज्ञातानि। दश धर्मकथानां वर्गाः, प्रत्येकधर्मकथायां पञ्च पञ्चाऽऽख्यायिकाशतानि, प्रत्येकाख्यायिकायां पञ्च पञ्चोपाख्यायिकाशतानि, प्रत्येकोपाख्यायिकायां च पञ्च पञ्चाऽऽख्यायिकोपाख्यायिकशतानि।एवमर्द्धचतुर्थाः कथानककोट्यो भवन्ति। एकोनत्रिंशदुद्देशनकाला एकोनत्रिंशत्समुद्देशनकालाः सङ्ख्येयानि पदसहस्राणि। शिष्टमुक्तवत्।

(७) उपासकदशासूपासकानां नगरादयः, मातापित्रादयः, धर्माचार्यादयः, शीलव्रतादयः, तपःप्रतिमोपसर्गाः संलेखनादयो देवलोकगमन-सुकुल-प्रत्यायाति-बोधिलाभा-ऽन्तक्रिया-श्चाऽऽख्यायन्ते।

तच्चाङ्गार्थतया सप्तममङ्गम्, एकः श्रुतस्कन्धः, दशाध्ययनानि, दशोद्देशनकाला दश समुद्देशनकाला सङ्ख्येयानि पदलक्षाणि पदाग्रेण। शिष्टं पूर्ववत्।

(८) अन्तकृद्दशासु चान्तकृतां

नगरादयो धर्माचार्यादयः प्रव्रज्यादयः केवललाभादयो मुक्तिसुखादयश्च विस्तरेण प्ररूप्यन्ते।

तच्चाङ्गार्थतयाऽष्टममङ्गम्, एकः श्रुतस्कन्धः, दशाध्ययनानि, सप्त वर्गा दशोद्देशनकाला दश समुद्देशनकालाः सङ्ख्येयानि पदसहस्राणि पदाग्रेण। शिष्टं प्राग्वत्।

(९) अनुत्तरोपपातिकदशासु चानुत्त-रोपपातिकानां नगरादयः प्रव्रज्याद-योऽनुत्तरोपपातादयोऽन्तक्रियाश्चाऽऽ-ख्यायन्ते। उच्यन्ते च तीर्थकरसमव-

सरणाद्यर्थाः। तच्चाङ्गार्थतया नवममङ्गम्, एकः श्रुतस्कन्धः, दशाध्ययनानि, त्रयो वर्गाः, दशोद्देशनकालाः, दश समुद्देशनकालाः, सङ्ख्येयानि पदलक्षाणि। शिष्टं प्राग्वत्।

(१०) प्रश्नव्याकरणेष्वष्टोत्तरं प्रश्नशतमष्टोत्तरमप्रश्नशतमष्टोत्तरं प्रश्नाप्रश्नशतं विद्यातिशया नागसुवर्णैः सह दिव्यसंवादाश्चाऽऽख्यायन्ते। तच्चाङ्गार्थतया दशममङ्गम्, एकः श्रुतस्कन्धः, पञ्चचत्वारिंशदुद्देशनकालाः, पञ्चचत्वारिंशत्समुद्देशनकालाः, सङ्ख्येयानि

पदलक्षाणि। शिष्टमुक्तवत्।

(११) विपाकश्रुते सुकृतदुष्कृतानां कर्मणां फलविपाक आख्यायते। स च समासतो द्विविधः- दुःखविपाकः सुखविपाकश्च। तत्र दश दुःखविपाकानि, दश च सुखविपाकानि।

तच्चाङ्गार्थतयैकादशममङ्गम्, विंशतिरध्ययनानि, विंशतिरुद्देशनकालाः, विंशतिः समुद्देशनकालाः, सङ्ख्येयानि पदलक्षाणि। शेषं प्राग्वत्।

(१२) दृष्टिवादे-सर्वभावप्ररूपणाऽऽ-

ख्यायते। स समासतः पञ्चविधः-
-परिकर्म सूत्राणि पूर्वगतमनुयोग-
श्चूलिका। परिकर्म सप्तविधम्-सिद्ध-
श्रेणिकापरिकर्मादि। सूत्राण्यष्टाशीतिः-
ऋजुकादीनि। पूर्वगतं चतुर्दशविधम्-
उत्पादपूर्वादि। अनुयोगो द्विविधः-
मूलप्रथमानुयोगो गण्डिकानुयोगश्च।
चूलिका चतुर्णामाद्यानां पूर्वाणां
चूलिकाः, शेषपूर्वाण्यचूलिकानि।

तच्चाङ्गार्थतया द्वादशममङ्गम्, एकः
श्रुतस्कन्धः, चतुर्दश पूर्वाणि, सङ्ख्ये-
यानि वस्तूनि, सङ्ख्येयानि लघुव-

स्तूनि, सङ्ख्येयानि प्राभृतानि, सङ्ख्येयानि प्राभृतप्राभृतानि, सङ्ख्येयाः प्राभृतिकाः, सङ्ख्येया प्राभृतप्राभृतिकाः, सङ्ख्येयानि पदलक्षाणि पदाग्रेण। शिष्टमुक्तवत्।

इत्येतद् द्वादशाङ्गं गणिपिटकमतीतकालेऽनन्ता जीवा आज्ञया विराध्य चतुरन्तं संसारकान्तारमनुपरिवृत्तवन्तः। परीता जीवा अनुपरिवर्त्तन्ते। अनन्ताश्चानुपरिवर्त्तिष्यन्ते। आराध्य त्वेतदनन्ता मुक्तिमवाप्ताः। परीता अवाप्नुवन्ति। अवाप्स्यन्ते चानन्ताः। पञ्चास्तिका-

यवच्छाश्वतमेतद् द्वादशाङ्गम्।

राशिद्वयम् – जीवराशिरजीवराशिश्च एतयोर्भेदप्रभेदाः श्रुताद्विज्ञेयाः। नरकाद्यावासाश्च। नैरयिकस्थितिः–जघन्यतो दशवर्षसहस्राणि, उत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमाणि। अपर्याप्तनैरयिकस्थितिस्तु जघन्येनाप्यन्तर्मुहूर्त्तमुत्कृष्टतोऽपि। एवं देवस्थितिरपि ज्ञेया।

शरीराणि–औदारिकादीनि। एषामपि भेदादिप्ररूपणाः श्रुतादवगन्तव्याः। द्विविधोऽवधिः–भवप्रत्ययिकः क्षायो–

पशमिकश्च। अवधिपदं कृत्स्नं भणितव्यम्। एवं वेदना-लेश्या-आहारपदान्यपि।

षड्विध आयुर्बन्धः-जातिनामनिधत्तायुःप्रभृतिः। नरकगत्युपपातविरहकालः-जघन्यत एकसमयः, उत्कृष्टतो द्वादशमुहूर्त्तानि। सिद्धिगतिगमनविरहकालः-जघन्यत एकसमयः, उत्कृष्टतः षण्मासाः। एवमुपपातदण्डको ज्ञेयः, सिद्धिवर्ज उद्वर्त्तनादण्डकश्च। आयुर्बन्धस्याकर्षा एकादारभ्याष्टपर्यन्ताः।

संहननषट्कम्–वज्रर्षभनाराचसंहन-नादि। नैरयिकदेवा असंहननिनः। शेषाणां तु यथायोगं ज्ञेयम्। संस्थान-षट्कम्–समचतुरस्रादि। नैरयिका हुण्डसंस्थानिनः। देवाः समचतुरस्र-संस्थानिनः। पृथ्वी मसूरसंस्थाना, अप् स्तिबुकसंस्थाना, तेजः सूचिकलाप-संस्थानम्, वायुः पताकासंस्थानः, वनस्पतिर्नानासंस्थानसंस्थिता। विक-लाः सम्मूर्च्छिमतिर्यङ्मनुष्याश्च हुण्ड-संस्थानाः। गर्भजतिर्यङ्मनुष्याः षट्सं-स्थानाः।

वेदत्रयम्–स्त्रीवेदादि। अतीतोत्सर्पिणीकुलकरसप्तकम्–मित्रदामप्रभृति। अतीतावसर्पिणीकुलकरदशकम्–स्वयञ्जलादि। वर्तमानावसर्पिणीकुलकरसप्तकम्–विमलवाहनादि। तद्भार्याः–चन्द्रयशआदयः। तीर्थकरपितरः–नाभ्यादयः। जिनमातरः–मरुदेव्याद्याः। तीर्थकृतः–ऋषभादयः। तत्पूर्वभवाभिधानानि वज्रनाभादीनि। तच्छिबिकाः–सुदर्शनाद्याः। अन्यदपि जिनचरित्रं श्रुताद्विज्ञेयम्।

द्वादश चक्रिणः–भरतादयः। तत्स्त्रीर–

त्नानि–सुभद्राद्या:।उत्तमत्वादिगुणोपेता नव वासुदेवास्त्रिपृष्ठाद्या नव च बलदेवा अचलाद्या:। तत्पूर्वभविकधर्माचार्या:– सम्भूतादय:। तत्प्रतिशत्रव:–अश्वग्रीवादयो नव। बलदेवा अनिदाना उर्ध्वगामिन:। वासुदेवा: सनिदाना अधोगामिन:।

एरवतक्षेत्रे वर्तमानावसर्पिणीतीर्थंकरा:– चन्द्राननाद्या:–अनागतोत्सर्पिण्यां भरतक्षेत्रे सप्त कुलकरा:–मृगवाहनाद्या:। एरवते तु दश–विमलवाहनाद्या:। अनागतोत्सर्पिण्यां भरतक्षेत्रे तीर्थंकरा:–

महापद्मादयः। तत्प्राग्भविकनामानि-श्रेणिकादीनि। अनागतचक्रिणः-भरतादयः। अनागतकेशवाः-नन्दादयः। अनागतरामाः-जयन्तादयः। अनागत-प्रतिवासुदेवाः-तिलकादयः।

एरवतेऽनागततीर्थकराः-सुमङ्गलादयः। एवमेतच्छास्त्रं तत्तदर्थप्रतिपादकत्वात् कुलकरवंशः, तीर्थकरवंशः, चक्रवर्तिवंश, गणधरवंशः, ऋषिवंशः, यतिवंशः, मुनिवंशः, श्रुतम्, श्रुताङ्गम्, श्रुतसमासः, श्रुतस्कन्धः, समवायः, सङ्ख्या-इति व्याख्यायते। समस्तमे-

तदङ्गमध्ययनमित्याख्या'' मितिब्रवीमि। मिथ्यास्तु दुरुक्तं मम। शोधयन्तु बहुश्रुताः।

इति

माघामावास्यां

कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे

तपागच्छीयाचार्यदेव-श्रीमद्विजय-प्रेम-

भुवनभानु-पद्म-हेमचन्द्रसूरिशिष्य-

आचार्यविजयकल्याणबोधिसूरिसञ्चिता

श्रीसमवायाङ्गसूत्रसारसञ्चयरूपा

समवायाङ्गोपनिषद्

*Don't Miss it.*



## લાભાર્થી

# શ્રી સુભાનપુરા શ્વે. મૂર્તિ. જૈન સંઘ

સુભાનપુરા, વડોદરા

જ્ઞાનનિધિ માંથી લાભાર્થી બનવા બદલ
શ્રી સંઘ તથા ટ્રસ્ટીઓની
ભૂરી ભૂરી અનુમોદના

૧૨૨